# Mantragarbha Dattatreya Ashtottarashatanama Stotram

# मन्त्रगर्भ दत्तात्रेयाष्टोत्तरशतनामस्तोत्रम्

## Document Information


Text title : dattAtreyAShTottarashatanAmastotram

File name : mantragarbhadatta108str.itx

Category : aShTottarashatanAma, deities_misc, dattAtreya, stotra, vAsudevAnanda-sarasvatI, mantra

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI

Transliterated by : Arun Shantharam shantharam.arun at gmail.com

Proofread by : Arun Shantharam shantharam.arun at gmail.com

Latest update : April 7, 2009

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


June 23, 2023

*sanskritdocuments.org*

# मन्त्रगर्भ दत्तात्रेयाष्टोत्तरशतनामस्तोत्रम्

ओंकारतत्त्वरूपाय दिव्यज्ञानात्मने नमः ।
नभोतीतमहाधाम्न ऐंद्र्यृध्या ओजसे नमः ॥ १॥

नष्टमत्सरगम्यायागम्याचारात्मवर्त्मने ।
मोचितामेध्यकृतये ऱ्हींबीजश्राणितश्रिये ॥ २॥

मोहादिविभ्रमान्ताय बहुकायधराय च ।
भत्तदुर्वैभवछेत्रे क्लींबीजवरजापिने ॥ ३॥

भवहे- तुविनाशाय राजच्छोणाधराय च ।
गतिप्रकम्पिताण्डाय चारुव्यहतबाहवे ॥ ४॥

गतग- र्वप्रियायास्तु यमादियतचेतसे ।
वशिताजातवश्याय मुण्डिने अनसूयवे ॥ ५॥

वदद्व- रेण्यवाग्जाला-विस्पृष्टविविधात्मने ।
तपोधनप्रसन्नाये-डापतिस्तुतकीर्तये ॥ ६॥

तेजोमण्यन्तरङ्गाया-द्मरसद्मविहापने ।
आन्तरस्थानसंस्थायायैश्वर्यश्रौतगीतये ॥ ७॥

वातादिभययुग्भाव-हेतवे हेतुबेतवे ।
जगदात्मात्मभूताय विद्विषत्षद्कघातिने ॥ ८॥

सुरव-र्गोद्धृते भृत्या असुरावासभेदिने ।
नेत्रे च नयनाक्ष्णे चिच्चेतनाय महात्मने ॥ ९॥

देवाधिदेवदेवाय वसुधासुरपालिने ।
याजिनामग्रगण्याय द्रांबीजजपतुष्टये ॥ १०॥

वासनावनदावाय धूलियुग्देहमालिने ।
यतिसंन्यासिगतये दत्तात्रेयेति संविदे ॥ ११॥

यजनास्यभुजेजाय तारकावासगामिने ।
महाजवास्पृग्रूपाया-त्ताकाराय विरूपिणे ॥ १२॥

नराय धीप्रदीपाय यशस्वियशसे नमः ।
हारिणे चोज्वलाङ्गायात्रेस्तनूजाय सम्भवे ॥ १३॥

मोचितामरसङ्घाय धीमतां धीरकाय च ।
बलिष्ठविप्रलभ्याय यागहोमप्रियाय च ॥ १४॥

भजन्महिमविख्यात्रेऽमरारिमहिमच्छिदे ।
लाभाय मुण्डिपूज्याय यमिने हेममालिने ॥ १५॥

गतोपाधिव्याधये च हिरण्याहितकान्तये ।
यतीन्द्रचर्यां दधते नरभावौषधाय च ॥ १६॥

वरिष्ठयोगिपूज्याय तन्तुसन्तन्वते नमः ।
स्वात्मगाथासुतीर्थाय मःश्रिये षट्कराय च ॥ १७॥

तेजोमयोत्तमाङ्गाय नोदनानोद्यकर्मणे ।
हान्याप्तिमृतिविज्ञात्र ओंकारितसुभक्तये ॥ १८॥

रुक्षुङ्मनःखेदहृते दर्शनाविषयात्मने ।
रांकवाततवस्त्राय नरतत्त्वप्रकाशिने ॥ १९॥

द्रावितप्रणताघाया-त्तःस्वजिष्णुःस्वराशये ।
राजन्त्र्यास्यैकरूपाय मःस्थायमसुबम्धवे ॥ २०॥

यतये चोदनातीत- प्रचारप्रभवे नमः ।
मानरोषविहीनाय शिष्यसंसिद्धिकारिणे ॥ २१॥

गङ्गे पादविहीनाय चोदनाचोदितात्मने ।
यवीयसेऽलर्कदुःख-वारिणेऽखण्डितात्मने ॥ २२॥

ह्रींबीजायार्जुनज्येष्ठाय दर्शनादर्शितात्मने ।
नतिसन्तुष्टचित्ताय यतिने ब्रह्मचारिणे ॥ २३॥

इत्येष सत्स्तवो वृत्तोयात् कं देयात्प्रजापिने ।
मस्करीशो मनुस्यूतः परब्रह्मपदप्रदः ॥ २४॥

॥ इति श्री. प. प. श्रीवासुदेवानन्द सरस्वती विरचितं
मन्त्रगर्भ श्री दत्तात्रेयाष्टोत्तरशतनाम स्तोत्रं सम्पूर्णम्॥

Encoded and proofread by Arun Shantharam shantharam.arun@ gmail.com
See accompanying colorcoded PDF file to see how the stotra is built creativly.
Starting lettter of each quarter of the line vertically forms a
mantra of different deity.

---

*Mantragarbha Dattatreya Ashtottarashatanama Stotram*

pdf was typeset on June 23, 2023

Please send corrections to *sanskrit@cheerful.com*